This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरण० भाष्य०

×ग्निमीळेपुरोहितमिषेत्वोर्जेत्वाअग्नआयाहिवीतयेशन्नोदेवीरभिष्टये इति

१ श्रीगणेशायनमः श्रीमल्ललितांबिकायैपरदेवतायैनमः ॐ अथातश्चरणव्यूहंव्याख्यास्यामस्तत्रयदुक्तंचातुर्वर्ण्यंवेदियं चत्वारोवेदाविज्ञाताभवंति ऋग्वेदोयजुर्वेदः
सामवेदोऽथर्ववेदश्चेति तत्रऋग्वेदस्याष्टौस्थानानिभवंति चर्चाश्रावकश्चर्चकःश्रवणीयपारः क्रमपारः क्रमपदः क्रमजटः क्रमदंडश्चेति चतुष्पारायणमेतेषां
शाखाः पंचभवंति आश्वलायनीसांख्यायनीशाकलाबाष्कलामांडूकाश्चेति तेषामध्ययनमध्यायाश्चतुःषष्टिर्मंडलानिदशैवतु वर्गाणांपरिसंख्यातंद्वेसहस्रे
षडुत्तरे सहस्रमेकंसूक्तानांनिर्विशंकंविकल्पितं दशसप्तसुपर्ण्यंते संख्यातंवैपदक्रमं एकंशतसहस्रंवाद्विपंचाशत्सहस्रार्धमेतानिचातुर्दशावाशिष्टानामि
तरेषांपंचाशीतिः क्रमकालेतुवेष्टव्यंचतुस्त्रिंशत्सहस्राणि द्विखंडानांसहस्राणांद्वात्रिंशत्षोडशोत्तराः चत्वारिंशत्सहस्राणिद्वात्रिंशत्कंचाक्षरसहस्राणिचांद
शसहस्राणिऋचांपंचशतानिच ऋचामशीतिपादश्चैतत्पारायणमुच्यते एकर्चएकवर्गश्चैकश्चनवकस्तथा द्वौवर्गौद्विवर्चौज्ञेयौत्रीणिद्व्यचशतस्तथा सहस्र
मेकंपंचकानांशतमूनविंशतिंसप्तकानांद्वेचसप्तोत्तरेशते चतुर्कचैत्रीणिचशतानिषट्कानांत्रीण्यष्टिरष्टकानां ९ अत्रसैपकाः ऋचांदशसहस्राणिऋचां ३

Acc. No. ~~1867~~ M1487
Title – चरणव्यूहभाष्य. (संपूर्ण)
Author – महीदास पंडीत.
Date – शके 1772
Subject – vedic
folio – 23
Xerox – 43

KKSU LIBRARY RAMTEK 441 106 Dist. Nagpur M-1487

Checked 2012

1

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचशतानिच ऋचामशीतिःपादश्चपारायणंप्रकीर्तितं १ एकर्चएकवर्गश्चनवकश्चतथास्मृतः द्वौवर्गौतुद्वृचौज्ञेयौऋकत्रयंचशतंस्मृतं २ चतुर्ऋचांपंच
सप्तत्यधिकंचशतंतथा पंचऋचांतुद्विशतंसहस्रंकद्रसंख्यया ३ पंचचत्वार्यधिकंतुषड्ऋचांतुशतंत्रयं सप्तऋचांशतंज्ञेयंविंशतिश्चाधिकास्मृता ४ अ
ष्टऋचांतुपंचाशत्पंचाधिकास्तथैवच दशाधिकाद्विसाहस्राःपंचशरवासुनिश्चिताः ५ वर्गाःसंज्ञानसूक्तस्यचत्वारश्चात्रमीलिताः एवंपारायणेप्रोक्ता
ऋचांसंख्यानन्यूनतः ६ अथभाष्यं ॐमित्येकाक्षरंब्रह्मनादबिंदुकलात्मकं त्रिदेवात्मत्रिमात्रंच स्फुटंविष्णुसनातनं १ कृष्णद्वैपायनंवंदेगुरुंवंदे
महामुनिं येनचरणव्यूहेपुण्याख्याभेदमितंकृतं २ तच्छिष्यंशौनकगुरुंवेदज्ञंलोकविश्रुतं नत्वातुशाकलाचार्यंतथैवचाश्वलायनं ३ एवंपरंपराप्राप्तं
बालकृष्णंमहागुरुं यस्यप्रसादाद्व्याख्यामिचरणव्यूहसंज्ञकं ४ अथातश्चरणव्यूहंव्याख्यास्यामः अथशब्दोमंगलेप्रस्तावेवा अथशब्दः सर्वमेवमंगला
र्थइत्यर्थः अतःहेत्वर्थः चरणव्यूहः वेदशाखाः चतुर्विभागाश्चरणाउच्यंते तेषांव्यूहःसमुदायः चतुर्वेदानांसमूहंव्याख्यास्याम इत्यर्थः कथमेकवेदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदुक्तमरण्यके सर्वेवेदाः सर्वेघोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यादिति तस्य चतुर्विभागाः कृताः तथा चोक्तं भागवते तेनासौ चतुरो वेदा
२ न् चतुर्भिर्वदनैः प्रभुः सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षणः पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन्
ते परंपरया प्राप्तास्तच्छिष्यैर्धृतव्रतैः चतुर्युगेष्वेवमेव व्यस्ता द्वापरादौ महर्षिभिः क्षीणायुषः क्षीणसत्वान्दुर्मेधान्वीक्ष्य कालतः वेदान्ब्रह्मर्षयो व्यस्य
हृदिस्थाच्युतनोदिताः अस्मिन्नप्यंतरे ब्रह्मन् स्वलोकलोकभावनः ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये पराशरात्सत्यवत्यामंशांशकलया वि
भुः अवतीर्णो महाभाग वेदं चक्रे चतुर्विधं ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः चतस्रः संहिताश्चक्रे सत्रैर्मणिगणा इव मंत्रैर्मणिगणा इवेति २
पाठांतरं तासां स चतुरः शिष्यानुपाहूय महामतिः एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह वैशंपायन
संज्ञाय निगदाख्यं यजुर्गणं साम्नां जैमिनये प्राह तथा छंदोगसंहितां अथर्वांगिरसीं नाम स्वशिष्याय सुमंतवे इति पैलः स्वसंहितामूचे इंद्रप्रमितये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनिः बाष्कलायचसोप्याहच्छिष्येभ्यः संहितांस्वकां चतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गवि पराशरायाग्निमित्रेइंद्रप्रमितिरात्मवान् अध्यापयत्सं
हितांस्वांमांडूकेयमृषिंकविं तच्छिष्योदेवमित्रश्चसौभर्यादिभ्यऊचिवान् इंद्रप्रमितिसुतोमांडूकेयः मांडूकेयसुतः शाकल्यः शाकल्यशिष्योदेवमित्रः
शाकल्यस्तत्सुतः स्वांतुपंचधाव्यस्यसंहितां वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् जातूकर्ण्यश्चतच्छिष्यः सनिरुक्तांस्वसंहितां बालाकपैंग्यवैता
लविरजेभ्योददौमुनिः बाष्कलिः प्रतिशाखिभ्योवालखिल्याख्यसंहितां चक्रेबालायनिर्भज्यकाशारश्चैवतांदधुः बह्वृचः संहिताएता एतैर्ब्रह्मर्षिभिर्धृताः
श्रुत्वैवछंदसांव्यासंसर्वपापैःप्रमुच्यते इतिश्रीमन्महाभागवतेद्वादशस्कंधेषष्ठोध्यायः अस्यार्थः व्यासोपैलः संहितापदक्रमंचत्रिविधरूपंपठित्वा
इंद्रप्रमितयेददौ शाकल्यःसंहितापदक्रमजटादंडरूपंच पंचधाव्यासंकृत्वावात्स्यमुद्गलशालीयगोखल्यशिशिरेभ्योददौइति पदेषुसंहितत्वंइतिकर
णंवेष्टनं उदात्तानुदात्तस्वरितस्वराणां एतंछंदसांव्यासंविस्तारंश्रुत्वासर्वपापैःप्रमुच्यतइत्यर्थः तथाचविष्णुपुराणे ब्रह्मणानोदितोव्यासोवेदान्व्यस्तुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ श्रीचक्रमे अथशिष्यान्ससंजग्राहचतुरोवेदपारगान् ऋग्वेदश्रावकंपैलंसंजग्राहमहामतिः वैशंपायननामानंयजुर्वेदस्याग्रहीत् जैमिनिःसामवेदस्य
तथैवाथर्ववेदवित् सुमंतुस्तस्यशिष्योऽभूत् वेदव्यासस्यधीमतइति तथाचगृह्यसूत्रं सुमंतुजैमिनिवैशंपायनपैलाःसूत्रभाष्यभारतधर्माचार्याइति
जानंतिवाहरीत्यारभ्यमांडूकेयाइत्यंतंमांडूकगणःसमुदायः गर्गीवाचक्नवीत्यारभ्यसांख्यायनमित्यंतंसांख्यायनगणः एतेषांकौषीतकीसूत्रंब्राह्मणमा
रण्यकंच ऐतरेयेत्यारभ्यआश्वलायनांताःआश्वलायनगणाः एषांसूत्रमैतरेयब्राह्मणारण्यके आश्वलायनसूत्रमित्यर्थः तत्रयदुक्तंचातुर्विध्यंचत्वारोवे
दाविज्ञाताभवंति अस्मिन्ग्रंथेयदुक्तंचातुर्विध्यंतेनचत्वारोवेदाःविज्ञाताःभवंति ऋग्वेदोयजुर्वेदःसामवेदोथर्ववेदश्चेति इतिस्पष्टार्थः वेदाहियज्ञार्थमभि
प्रवृत्ताः तेचयज्ञाःद्विविधाः अग्नौहूयमानाअनग्नौप्रहुताः अग्नौहूयमानावैतानिकाः अनग्नौप्रहुताःनित्यस्वाध्यायोब्रह्मयज्ञपारायणंच अत्रगृह्यसू
त्रेब्रह्मयज्ञखंडे यदृचोधीतेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्ब्राह्मणा
स॰= २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निकल्यान्गाथानाराशंसीइतिहासपुराणानीत्यमृताकुल्यायद्द्विजोधीते स्वधाश्चास्य पितॄंउपक्षंतीति तत्रऋग्वेदस्याष्टभेदाः भवंति स्थानानि भवंतीतिपा
ठांतरं शाकलबाष्कलौ २ ऐतरेयब्राह्मणारण्यकौ ४ सांख्यायनमांडूकौ ६ कौषीतकीयब्राह्मणारण्यकौ ८ इत्यष्टभेदाः अन्यच्च वेदाविकृतिशाखाश्च
भेदास्तुत्रिविधस्तथा षष्ठ्यन्नामाभिधानेन व्यासेन कथितं पुरेति अत्राष्टभेदेनाष्टस्थानेनवा विकृतिर्ज्ञात्वा विकृतीस्तत्रैव वक्ष्यामः तस्माद्धुत्वयज्ञार्थे
पारायणेन्वऋग्वेदस्याध्ययनं कर्तव्यं ततश्चतुष्पदेन वक्ष्यति चर्चाश्रावकश्चर्चकः श्रवणीयपार इति चर्चाऽध्ययनं तत्रश्रौतसूत्रं चितिपूजिकथिकु
बिचर्चाश्च एष्योऽङूःस्त्रियांभावादौ चितिस्मृत्यां पूजिपूजायां कथिवाक्यप्रबंधे कुंबिआच्छादने चर्चाध्ययने चरादयइत्यष्टाध्यायसूत्रे तात्वोष्ठपु
टव्यापारेण शब्दस्य श्रवणंक्रियते सा चर्चा तदध्ययनस्य श्रावको गुरुः तस्य चर्चकः शिष्यः श्रवणीयपारः श्रवणीयो वेदः तस्य पारः समाप्तिः ५ इतिच
तुष्पदेनाध्ययनं सूचितं अग्रेचतुष्पदेन चत्वारि पारायणानि सूचयिष्यति तत्पारायणं द्विविधं प्रकृतिरूपं विकृतिरूपंच का प्रकृतिः का विकृतिः प्रकृतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ संहिता साद्विविधा रूढा योगा रूढायथा अग्निमीळेपुरोहितमिति योगायथा अग्निमीळेईळेपुरोहितं इतिप्रातिशाख्येद्वितीयपटले भाष्यकारेणव्याख्या
तं अथचतुष्पारायणंयथा क्रमपारः क्रमपदः क्रमजटः क्रमदंडश्चेतिचतुष्पारायणं क्रमशब्दः उभयसंहितावाच्यः सकथं अनुलोमविलोमाभ्यां द्विवारं
हिपठेत्क्रमं विलोमेपदवत्संधिरनुलोमेयथाक्रमं १ यथाक्रमंयथासंहितेत्यर्थः अन्यच्च वर्णक्रमः अक्षरसमाम्नायएवेत्यारण्यके कथमपिवेष्टयेरि
त्यक्षरशः यद्वा अर्धर्चशः ऋक्शः इतिब्राह्मणं भूयांसितुसमाम्नानाद्यंजनपात्रंतुतरस्याभिधानस्य भवतिनैरुक्तः क्रमःसंहितावाचीकथं पदप्रकृ
तिःसंहितेतिनैरुक्तवचनात् साक्रमरूपेत्यर्थः क्रमपदः क्रमःसंहितांतः स्वाहायदानि इतिद्विप्रकृतिपारायणेद्वेविकृतिरूपे विकृतिस्त्वष्टधाभव
ति तत्र जटामालाशिखालेखाध्वजोदंडोरथोघनः अष्टौविकृतयःप्रोक्ताः क्रमपूर्वामहर्षिभिरिति आसांमध्येजयदंडयोः प्राधान्यं तत्कथं जटा
नुसारिणीशिखा दंडानुसारिण्यः मालालेखाध्वजोरथश्च घनस्तुउभयलेखानुसारवान् अस्याः नियमवाक्यानिव्याडीकृतजटापटलेउदाहरणानिच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रजटावाक्यं क्रमोयथोक्तेपदर्जातमेवद्विरभ्यसेदुत्तरमेवपूर्वं अभ्यस्यपूर्वंचतथोत्तरेपदेवसानमेवंहिजटाभिधीयते १ अस्यार्थः क्रमेयथोक्तेसतिक्र
मोद्वाभ्यांइतिअलं उक्तेक्रमप्रकारेपदजातंपदद्वयंवापदत्रयंवाद्विवारमभ्यसेत् द्विवारंपठेत् अभ्यासप्रकारः उत्तरमेवपूर्वंक्रमवत्पदद्वयंगृहीत्वापूर्वं
नामप्रथमंउत्तरपदमभ्यसेत् ततः उत्तरपूर्वपदयोः संधानद्वारापूर्वंद्विरभ्यस्योत्तरपदेअवसानं एवंप्रकारेणअध्ययनंजटाअभिधीयतेकथ्यतेइतिनिष्क
र्षार्थउदाहरणेनदृश्यते अग्निमीळेईळेग्निमग्निमीळे। ईळेपुरोहितंपुरोहितमीळेईळेपुरोहितं। इत्यादिज्ञेयं। अथदंडलक्षणं क्रममुक्त्वाविपर्यस्य
पुनश्चक्रममुत्तरं अर्धर्चादिवमुक्तोक्तः क्रमदंडोभिधीयते २ उदाहरणं अग्निमीळे ईळेग्निम् अग्निमीळे ईळेपुरोहितम् पुरोहितमीळेग्निमित्या
दिज्ञेयं अथमालालक्षणं अयात्क्रमविपर्यासावर्धर्चास्यादितोंततः अंतंचादिंनयेदेवंक्रममालेतिगीयते मालामालेवपुष्पाणांपदानांग्रथिनीहिसा
आवर्तमेत्यंतस्यांक्रमस्युत्क्रमसंक्रमैः ३ अथशिखालक्षणं पदोत्तरांजटामेवशिखामार्याःप्रचक्षते ४ अथलेखालक्षणं क्रमाद्विलिचतुःपंचक्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ मथुराहरेत् पृथक्पृथग्विपर्यस्यलेखामाहुः पुनः क्रमात् ५ अथध्वजलक्षणं श्रूयादिः क्रमं सम्यगंतादुत्तारयेद्यदि वर्गेवाऽऋचिवात्रपठनं सध्वजः
स्मृतः ६ अथरथलक्षणं पादशोऽर्धर्चशोवापिसहोक्त्यादंडवद्रथः ७ अथघनलक्षणं जटामुक्त्वाविपर्यस्यघनमाहुर्मनीषिणः ८ अन्यच्च जटाशिखा
घनाः प्रोक्ताः क्रमपूर्वामनीषिभिः ९ इति विकृतिलक्षणान्युक्तानि अध्ययने संहितापारायणं पदपारायणं जटापारायणं क्रमदंडपारायणंच च
४ तुष्पारायणमित्यर्थः एतेषां शाखाः पंचभवंति एतेषां वेदपारायणानां पंचशाखाः भवंतीत्यर्थः ताः काः आश्वलायनी सांख्यायनी शाकला बा
ष्कला मांडूकाश्चेति इति प्रसिद्धाः तेषामध्ययनं तेषामाश्वलायनीयादिशाखानां समानाध्ययनं सूचयति अध्यायाश्चतुःषष्टिः अग्निमीळे अयं दे ळे ५
वायेतायाअयं वायस्येत्यादि ६४ चतुःषष्टिरध्यायाइत्यर्थः मंडलानि दशैवतु अग्निमीळे सुंसमक इत्यादि उपाकर्मणि प्रसिद्धा इत्यर्थः वर्गाणां परिसं
ख्यातं द्वे सहस्रे षडुत्तरे वर्गाद्याऋचां तासंख्यावालखिल्यैर्विनाज्ञेया षडुत्तरसहस्रद्वयवर्गा इत्यर्थः २००६ सहस्रमेकं सूक्तानां निर्विशंकं विकल्पितं दश ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्तसुपठ्यंते सप्तदशाधिकसहस्रं सूक्तानीत्यर्थः १०१७ संख्यानं वै पदक्रमं एकं शतसहस्रं वा द्विपंचाशत्सहस्रार्धमेतानि चतुर्दश वाशिष्ठानां मितरेषां
पंचाशीतिः एकलक्षद्विपंचाशत्सहस्रपंचशतचतुर्दश वाशिष्ठानां वाशिष्ठगोत्रियाणां इंद्रो तिरेकस सतिपदात्मको वर्गो नास्ति १५२५१४ इतरगोत्रिया
णां पंचाशीत्यधिकपदानीत्यर्थः १५२५८५ अथ वालखिल्यसंहितापदसंख्योच्यते लक्षैकं त्रिपंचाशत्सहस्रं शतसप्तकं पदानि च द्विनवतिः प्रमाणं शाक
लस्य च १ एकलक्षत्रिपंचाशत्सहस्रसप्तशतद्विनवतिश्चाधिकानि पदानीत्यर्थः १५३७९२ पदानि वालखिल्यस्य अर्कसंख्याशतानि च अधिकानि तु सप्त
व वर्गाश्चाष्टादश स्मृताः १ वर्गाः १८ पदानि सप्ताधिकद्वादशशतानीत्यर्थः १२०७ इत्याश्वलायनानां सांख्यायनानां तु वालखिल्यसंहितापदसंख्योच्यते शा
कल्यदृष्टेपदलक्षमेकं सार्धं तु वेदे च त्रिसहस्रयुक्तं शतानि सप्तैव तथाधिकानि चत्वारि त्रिंशाच्च पदानि चर्चा १ शाकल्यो मांडूकगणस्थः संहितापदानि एकल
क्षत्रिपंचाशत्सहस्रसप्तशतचतुस्त्रिंशदधिकानीत्यर्थः १५३७३४ पदानि वालखिल्यस्य रुद्रसंख्याशतानि च षट्पंचाशदधिकानि वर्गाः सप्तदशैव तु १ वर्गाः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ पदानिएकादशशतषट्पंचाशदधिकानिवालखिल्यानामित्यर्थः ११५६ अष्टपंचाशल्लशात्मकऋकत्रयकस्यपमलिजोवर्गोनास्ति तत्तुहविष्यांतसूक्ते द्वेसमी
चीवर्गेद्विऋचानंतरंएकएवाग्निऋकयमलिजोऋकखिलरूपेणपठंति ज्योतिष्मंतमृचाभावः ऋकत्रयस्यतेषांमतेपदाभावात् अंतेवर्गेसमोक्तोयावन्मात्र
मृचांपठंति एवंद्वेसमीचीषड्चोवर्गः आश्वलायनानांचतुर्ऋचात्मकोवर्गः इत्याश्वलायनसांख्यायनशाखयोरध्ययनयोर्भेदयोरित्यर्थः यस्यमंत्रस्यप
भावा ४ दाभावस्तस्यखैलिकत्वंसिद्धं नहिञ्यंबकंयजामहेत्र्यंबकपदस्यखैलिकत्वंसिद्धं नहिउमानागात् उपलेख्यायां त्र्यंबकंप्रथमंपदंनःप्रज्ञायतेऋतंचे
त्यरऋममिमसुमयाभिगीश्वमितिउमया अर्धर्चांतेपदंगीतं तस्मात्पदकालेपठंति ऋमोद्वेपदत्राइतिवचनात् अत्रद्वितीयपदंनास्तिअर्धर्चांतिसमाप
नात् ऋमाभावा तस्मात्पदऋमकालेकालेपठनंसएनंपदऋमइत्यर्थः ऋमकालेतुवेष्टव्यंचतुस्त्रिंशत्सहस्राणि षत्वेणत्वेत्वदीर्घत्वेआकारेसानुनासिके
त्रिचतुःपंचऋमेचअर्धर्चांतेत्वेवेष्टयेत् ३ ऋमेणोदाहरणानिज्ञातव्यानि सुषुमायांतं मोषूणः वाजेषुसाहिं सर्वेव आउयानसः व्याविध्यक्षिलीविनम्य ६

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आगारे द्रोगुरुघ्न निरुक्तसामस्तोत्पषसं अग्निमीळे ऋत्विजमि।त्वृत्विजमिति चतुस्त्रिंशत्सहस्राणि क्रमकालेषु अष्टनानीत्यर्थः ३४००० द्विखंडानांसह
स्राणांद्वात्रिंशत्षोडशोत्तराः षोडशोत्तरद्वात्रिंशत्सहस्राणि द्विखंडानीत्यर्थः ३२०१६ चत्वारिंशतसहस्राणि द्वात्रिंशतंचाक्षरसहस्राणि चतुर्लक्षद्वात्रिंशत्सहस्रा
ण्यक्षराणीत्यर्थः ४३२००० द्वात्रिंशतंचाक्षरसहस्राणीति अर्थसमाप्तेः पुनर्वचनमुक्तं अथपारायणक्रमपरिमाणमुच्यते ऋचांदशसहस्राण्यृचांपंचशता
निच ऋचामशीतिःपादश्चपारायणंप्रकीर्तितं एतत्पारायणंवालखिल्यैर्विनासंख्यातं वालखिल्यानिपारायणेनसंति तदुच्यते ऋग्वेदांतर्गतवालखि
ल्यमेकादशसूक्तं सूक्तसहस्रसप्तदशाधिकमित्यत्र ऋचांदशसहस्राणीत्येतत्संख्याव्यतिरिक्तानिवालखिल्यानीतिप्रसिद्धिः तत्रयज्ञानुष्ठानेब्राह्मणेसू
त्रेचश्रूयते वालखिल्याःशंसंति प्राणावैवालखिल्याइति अक्षिप्रवःसुराधसमिति षड्वालखिल्यानांसूक्तानि ब्राह्मणेआरण्यके अथवालखिल्यविहृतो
दुक्तंषोडशिनेतिसूत्रकारः श्रौतस्मार्तकर्मानुष्ठानेवालखिल्यप्रसिद्धिः वेदपारायणेवर्ज्यमित्यर्थः॥ वालखिल्यसंहितासर्वानुक्रमणीयमंत्ररूपिणीऋकसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ.अ.भा.

६ ख्या उच्यंते द्विपंचाशदधिकपंचशतसहस्राणीति १०५५२ वालखिल्यव्यतिरिक्तसंख्यातु द्विसप्तत्यधिकचतुःशतदशसहस्रात्मक १०४७२ एतत्संख्यानि
त्यद्विपदा नैमित्तिकद्विपदासहितउक्ता हवनाध्ययनाभ्यांसमानासानित्यद्विपदा आसांसंख्याउपलेखायां तच्च सारसिक्या सिषक्तुनउरोदेवाउरोदे
नाविद्वेषांस्पयावाजंमहिराधश्रवांसुम्नेतिदेवापरायणस्कामः प्रतिनस्तोमंस्वायुधासः पितुर्नपुत्रः सनेवाजेषुगावोनयूथंपवस्वसोममंद्यांनितिस्रः
परिसुवानोन्दक्षिर्येमानः प्रत्यंचकर्मभनयंघृचीपिरिति द्विपदैकपदा २२ द्वाविंशतिस्तासांसप्तदशद्विपदा १७ एकपदाः पंचइति हवनाध्ययनेवि
परीतास्तानैमित्तिकद्विपदा ताः अहवर्गरूपेण पश्चान्नतायुंदशारपिर्नदशावनेषुदशश्रीणांदशश्रुक्रः श्रुश्रुकांदशावनेमध्वीदशाग्रेत्वंनश्चत्वार्य
ग्नेभवषअयुक्तेतुदशराजाराष्ट्रानांदशकईप्सन्तादशबभ्रुरेकोदशापरिप्रयन्वदशातंतेसोमारोक्षादशोमानुकंचत्वार्याथाहिवनसाचत्वारि नैमित्तिक
द्विपदाचत्वारिंशोतरशतमिति हवनेएकैका अध्यापयनेद्वेद्वे आसांअंत्याएकाउर्वीरितासानित्यद्विपदा उक्तंचपरिभाषायां विशिकाद्विपदाविराजग ६

६

दर्धमेकपदा द्विर्द्विपदास्तृचः समामनंति अग्नुंस्येत्यादिपदेवेति द्विर्द्विपदास्तृचः समामनंति यस्य सूक्तस्य द्विर्द्विपदाः समामनंति तास्तृचः अध्ययनेचतु
ष्पदाः कर्त्तव्येत्यर्थः अग्नुंस्वेत्याद्विपदेवा सूक्तस्यर्चायुजोयानभवंतितास्त्वंत्यानित्यद्विपदेव एवमध्ययनेद्व्यावर्धर्चक्रगेव प्राधान्यं त्रीण्यर्धर्चायथाकथं तत्रापि
द्व्यावर्धर्चावेनैकऋचां अर्धर्चएकाकर्तव्या अध्ययनसंप्रदायबलात् अनादेर्नोऽग्नदाशुषः पदाश्चतुष्पदाश्चर्च इतिपरिभाषायां अध्ययनेत्रीण्यर्धर्चैकऋगेवसं
प्रदायोनास्ति आसांपरिमाणमाह अग्निंहोतारंपंचसहि शार्धेनिषळयंजायतपंचविंशोविवाहायास्त्रिंशोयत्वंरथपंचप्रतद्वोचेयंषळेंद्र्याद्युपनः पुंवमांते
वाचंचत्वारिंसनोनव्येभिर्वर्ज्यमिंद्रायहिद्यौः सप्तत्वयावयंषळवर्यहएकावनोतिहिएकालाजुवः षट्स्तीर्णंपंचमेवांसोमाएकातिवायोएकाप्रसुज्येष्ठंषळतीदेवा
नांवर्ज्यंसुषुमायंतंत्रीणि प्रपक्षम्नश्वतुष्कमस्तुश्रौषट्चत्वारिंरश्चीभिर्नोवर्ज्यंदृषंनिंद्रपंचयेदेवासोवर्ज्यंनवसंनर्यमेकासरवेसरवायमेकायास्चात्रीण्येतास्त्री
णित्रीण्यर्धर्चाऋचाहवनीयाश्चतुर्नवतिसंख्याइति त्रीण्यर्धर्चैकऋकस्तवने अध्ययनेअर्धर्चद्वयेनऋगेका अर्धर्चेनैका एवंकृत्वायकर्तव्येइत्यर्थः एकर्चस्पऋगद्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ यविराड्छंदोविनाकथंभवतीत्याशंक्य तत्रोच्यते विराट्छंदः सर्वछंदसिव्याप्तंवर्तते उक्तंचारण्यके चत्वारः पुरुषाः इत्याध्वः शारीरः पुरुषः छंदः पुरुषोवेदपु
रुषोमहापुरुषइति तस्योष्णिग्लोमानित्वग्गायत्री त्रिष्टुप्मांसमनुष्टुप्स्नावास्थि जगती पंक्तिर्मज्जाप्राणो बृहस्पतिरिति यान्येतानि विराट्चतुर्थान्येवम
हैवैवंविदुषएतदहः सर्वैश्छंदोभिः प्रतिपन्नंभवतीति प्राप्तोभवतीत्यर्थः गायत्रीश्चपंक्तीश्चव्यतिषजति गायत्रोवैपुरुषवै ब्राह्मणं अत्रोदाहरणं पयस्पसो
मसंदनितिस्तोद्विपदागायत्र्यइतिसर्वानुक्रमणी द्विपाद्वैपुरुषोवीर्यंत्रिष्टुप्विराड्यामनयोर्हिविंदयोद्विपदयोरयंपुरुषः अत्रोदाहरणानि आवांसु
म्नेवरिमन्० अस्यंचकर्ममनयन्० परिसुवानोहरिरंशुः जतीपादइति एवंसर्वव्याप्तोभवतीत्यर्थः छंदांसिजज्ञिरइतिश्रुतिः तथाचशतपथब्राह्मणे तद्राहुः
किंछंदः कादेवताग्नेः प्रतिष्ठेइतिद्विपदाछंदोविष्णुर्देवताप्रतिष्ठेति यथाविष्णुः सर्वव्याप्तस्तथाविराट्छंदइत्यर्थः विराट्छंदस्त्वचतुष्टयः त्रीण्यर्धर्चायांपंचया
दऋक्कर्तव्येतिकिंप्रमाणंतत्रोच्यते एकपाद्भूयोद्विपदोक्विचऋमेद्विपात्त्रिपादमस्येतिपश्चाञ्चतुष्पादेतिद्विपदामभिस्वरेसंपद्यन्पंक्तीरूपतिमानः एकौद्विपदानिस्य ९
पस्०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विपास्त्रिपादमस्येति एकीभवतीक्षतादृत्यर्थः अस्योदाहरणं अग्निंहोतारं मन्येदा० दसं यऊर्ध्वयापा अग्नेअर्धचर्धित्तस्य विभाष्टिरितिद्विपदाइति चतुष्पदातु पश्चाय
नापु० एकर्धर्चत्रिपदाएकार्धर्चाद्विपदाएकऋक्पंचपदा अध्ययने द्विर्द्विपदास्त्वृचः समामनंतिइत्यत्रसमपादग्रहणात् असमानपदा विद्वान्तर्हिपंक्तिछंदसे पंचपदा
भवंति तस्यद्वितीयपादो विराट् तस्मात्पंचपदत्वंप्राप्तं समपादावाअसमपादाविराट्छंदइत्यर्थः अत्रश्रुतिः समोवित्थस्तोनसमोविविष्टः संमातराएचिरत् इत्य
नयाऋचापरिहारः दक्षिणवामहस्तौसमौकार्यौत्वेअसमावित्यर्थः अथाध्ययनेऋक्संख्याउच्यंते षण्णवत्यधिकचतुःशतदशसहस्राणीति १०४९६ नाःसहि
तनैमित्तिकद्विपदाश्चत्वारिंशोत्तरशतदशसहस्राणीति १०१४० संज्ञानमुशनावदत्सूक्तस्यपंचदशानैकीकृत्यएवंपारायणेऋक्संख्या १०५८० ऋचांदशसहस्रा
णीतिवचनस्यसंख्यानांभवतीत्यर्थः एकाउर्वरितासा भद्रंनोअपिवातयमनइतिपादाधिक्यमनुक्रमणिदक्षिणोक्तंषड्ऋचमियारण्यके अथसंज्ञानसूक्तं सं
ज्ञानमुशनावदत्संज्ञानंवरुणोवदत् संज्ञानमिंद्रश्चाग्निश्चसंज्ञानंसवितावदत् संज्ञानंनरेभ्यःसंज्ञानमरणेभ्यः संज्ञानमश्विनायुवमिहास्मासुनियच्छतां य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ क्सीवासंवननंपुत्रोअंगिरसामवे तेननोद्यविश्वेदेवाः संप्रजांसमवीवनां संवोमनांसिसंजानतांसमाकूतिर्मनामसि असौयाविमनाजनस्तांसमावर्तयामसि तच्छंयो
रावृणीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनः स्वस्तिर्मानुषेभ्यः ऊर्ध्वंजिगातुभेषजंशंनोअस्तुद्विपदेशंचतुष्पदे ऋक०५।१।नेजर्हर्षंसेदाः हरणं परि
वर्मातुयस्त्वविः तेनअमित्रान्बर्हन्हविषा नाशयामसि परिवर्त्मान्येषामिंद्रः पूषाचसस्रुतः तेषांवोअग्निदग्धानामग्निमूल्हानामिंद्रोहंतुवरंवरं एषुन
ह्यवृषाजिनंहरिणस्यधियंयथा पराअमित्राएषत्वर्वाचीगौरुपेजतु ऋक०३।२। प्राध्वराणांपतेवसोहोतर्वरेण्यंतुभ्यगायत्रमुच्यते गोकामोअन्नकामः प्र
जाकामउतकश्यपः भूतंभविष्यत्प्रस्तौमिमहद्ब्रह्मैकमक्षरं यदक्षरंभूतकृतोविश्वेदेवाउपासते महर्षिमस्यगोप्तारंजमदग्निमकुर्वते जमदग्निराप्यसिघं·
देभिस्त्वतुरक्षरैः राजःसोमस्यभक्षेण ब्रह्मवीर्यावतां शिवानःप्रदिशोदिशः ऋक०५।३। अजैयत्तेजोज्योतिःकृत्जोतिः पुरोगुहा तदृषिः कश्यपःसौतिस
त्यब्रह्मचराचरं ध्रुवंब्रह्मचराचरं त्र्यायुषंजमदग्नेः कश्यपस्यत्र्यायुषमगस्त्यस्यत्र्यायुषं यद्देवानांत्र्यायुषं तन्मेअस्तुत्र्यायुषं तच्छंयोरावृणीमहे० ऋक०३।४।

६

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिसंज्ञानसूक्तंपंचदशर्चात्मकं अस्यग्रहणेप्रमाणंआश्वलायनसूत्रं तच्च समानीवइत्येकातच्छंयोराद्दणीमहइत्येकेति तथाचसांख्यायनस्यकौषीतकीसूत्रं
तच्च अथोपाकर्मौषधीनांप्रादुर्भावेहस्तेनश्रहेकआहुः सूक्तानुवाकाद्याभिरितिवा अध्यायार्थैर्यादौपिरितिमांडूकेयाथहस्माहकौषीतकीऽग्निमीळेपुरोहि
तमित्येकाकुत्सुभकस्तदब्रवीदावेदंत्वशकुनेभद्रमावदतूष्णीनाज्ञमदग्निनाधामंतेविश्वंभुवनमधिश्रितं गंतानोयज्ञंयज्ञियाः सुशमीयोनः स्वोअरणः प्रति
चक्ष्वविचक्ष्वाग्नेपाहिमरुत्सखायतेराज्ञं घृतंहविरितिद्वचातच्छंयोराद्दणीमहइत्येकाहुतनोवास्पतिविषःप्राश्नंतीति पंचत्रारवानंपारायणेतच्छंयोराद
णीमहइत्यत्रसमाप्तिरेकवेदत्वात् उक्तंच सांख्यायनीचमांडूकावाष्कलस्तथा बव्हृचाऋषयःसर्वेपंचैतेत्वेकवादिनइति सांख्यायनामकसांख्यायनमि
ति अथपारायणेवर्गसंख्याउच्यते एकर्चएकवर्गश्च एकर्चएकवर्गइत्यर्थः आयाहिवीतयेति द्वौवर्गौतुद्वृचौज्ञेयौ द्वौवर्गौद्वृचाविस्यर्थः अग्नेत्वंनोअंतमः आ
याहिवनसासहेति ऋकत्रयस्यशतंस्मृतं त्र्यृचोवर्गाः शतमित्यर्थः १०० उतत्यंचमसंनवमित्यादि चतुर्ऋचांपंचसप्तत्यधिकंचशतंतथा चतुर्ऋचवर्गाः श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० काद्दशाधिकद्वादशशतानीत्यर्थः १२११ अग्निमीळे इत्यादि पंचचत्वार्यधिकं तु षड्ऋचां तु शतत्रयं षळर्चवर्गाः पंचचत्वारिंशत्यधिकशतत्रयमित्यर्थः ३४५
अश्विनायज्वरीरिषदित्यादि सप्तऋचां शतं ज्ञेयं विंशतिश्चाधिका स्मृता सप्तर्चवर्गाः विंशत्यधिकशतमित्यर्थः १२० यच्चिद्धि सत्यसोमपा इत्यादि अष्टऋ
चां तु पंचाशत्त्र्यधिका स्तथैव च अष्टर्चवर्गाः पंचाधिकपंचशता इत्यर्थः ५०५ इंद्रं विश्वा अवीवृधन्नित्यादि दशाधिकद्विसहस्रं एवं दशाधिकद्विसहस्र
वर्गा इत्यर्थः २०१० एवं पारायणे प्रोक्ता ऋचां सतन्यूनतः एवं पूर्वोक्तप्रकारेण वर्गस्य ऋक्न्यूनसंख्येन दशार्चस्य पंचऋक्कर्तव्येत्यर्थः एवं चतुर्विधपारा
यणेपि ज्ञेयं समानी व इति शाकलस्य नांतच्छंयोरिति बाष्कलानामित्यत्र बाष्कलशाखाध्ययनमनुक्रमणिकेस्वकं तत्र गोतमादो द्विजः कुत्सः पारुच्छेपा
दपः परः कुत्सादीर्घतमेत्येष बाष्कलाध्ययने क्रमः अस्यार्थः गोतमादो द्विजः कुत्सः उपप्रयंतो नासत्याभ्यां अग्निं होतारं इमं स्तोमं वेदिषदे एष बाष्क
लक्रम इत्यर्थः पारुच्छेपादपेः परः कुत्सदीर्घतमाख्येष तु बाष्कलक्रमः उपप्रयंतो इमं स्तोमं नासत्याभ्यां अग्निं होतारं वेदिषदे इति बाष्कलक्रम इत्यर्थः अ १०

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनाद्युक्तं महार्णवे तीर्थे देवालये गेहे प्रशस्ते तु परिष्कृते कलशं सुदृढं तत्र सुनिर्णीतं सुधूपितं पुष्पपल्लवमालाभिश्चंदनैः कुंकुमादिभिः मृत्तिकापल्लवसंमि
श्रं वेदीमध्ये न्यसेत्ततः पंचाशद्भिः कुशैर्ब्रीः कार्यो ब्रह्मा पंचमुखः स्थितः स्नापितः स्थापितः कुंभश्चतुर्बाहुश्चतुर्मुखः वत्सजाबाल्कृतिर्वेदरुत्तराग्रैः कुशैः कृतं
ब्रह्मोपधाने दत्वा तं ततस्त्वध्ययनं पठेत् प्रतिष्ठां कारयेत्स्वाल्लजाड्व्यमथोच्यते यज्ञोपवीतं नैवेद्यं वस्त्रं चंदनकुंकुमेः स्रग्धूपदीपतांबूले रत्नैश्चापि पिता
महं ब्रह्मजज्ञानमिति वा गायत्र्या वा प्रपूजयेत् उपाध्यायश्च संपूज्यो यथापात्रं तथा पठेत् ततो वक्ष्यमाणहोमं कृत्वा पठेत्ततः तेनैव बौधायनः स्थंडिलं कल्प
यित्वाग्निमुपसमाधाय संपरिस्तीर्याज्येनैताभ्यो जुहोति अग्नये सोमाय विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्य ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै धारणायै
श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये कांडऋषिय अग्नये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः संहिताभ्यो देवताभ्य उपनिषद्भ्यो हव्यवाहाय विश्वेभ्यो
भ्यो देवेभ्यो वरुणेभ्यो अनुमत्यै स्विष्टकृते च पृथक् स्वाहाकारेण हुत्वा व्याहृतीभिश्च हुत्वा पुनः परिषिंचति समाप्ते चैता यजुषा तर्पयति एवमृग्वेदस्य कांडऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२ ष्यादिवर्ज्यमास्विष्टकृतं तेषां स्थाने त्वात ऋषिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवाय अत्रये भरद्वाजाय जामदग्न्याय गोतमाय वसिष्ठाय प्रगाथेभ्यः
पावमानीभ्यः क्षुद्रसूक्तेभ्यो महासूक्तेभ्यो महानाम्नीभ्य इति ततो वेदादिमारभ्य संततमधीयते त्याह भगवान् बोधायनः पुनर्महार्णवे अथातः पारायणविधिं व्या
ख्यास्यामः आसमाप्तेर्नाश्नीयाद्यथाशक्ति वा पयः फलं चोदनं वा हविष्यमात्रमन्नं भुंजानस्तद्व्रतमधीयीत ग्रामात्प्राच्यामुदीच्यां वा दिशि समुपनिष्क्रम्य अग्निमु
पसमाधाय परिस्तीर्याथ प्रदाय आज्येनैताभ्यो देवताभ्यो जुहोति अग्नये सोमायेंद्राय प्रजापतये बृहस्पतये विश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यो यजुर्भ्यः सामभ्यः कांड
ऋषयेग्नये कांडऋषये विश्वेभ्यो देवेभ्यः कांडऋषिभ्यः संहिताकीभ्यो देवेभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्यो हव्य
वाहाय विश्वेभ्यो वरुणेभ्योऽनुमत्यै स्विष्टकृते पृथक्स्वाहाकारेण हुत्वा व्याहृतीभ्यश्च पुनः परिषिंचति समाप्ते चैता यज्जुपात्तर्पयेदिति अंते एताग्नीसोमाद्याः यज्ञपा
यजुर्वेदेन सह तर्पयेत् यद्वा अ देवानां स्तर्पयामीत्यादि यज्जुपात्तर्पयित्वा गन्धारीं स्तर्पयेदित्यर्थः महार्णवे एवं ऋग्वेदिनां कांडऋष्यादिवर्ज्यं स्विष्टकृतस्तेषां स्था ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नैवोक्तेऽन्तमंडलेनवकेऽनुक्तविपर्यासः तच्च स्वादोरभक्षिसूक्तं तेऽभिप्रस्रवः सुराधसं प्रसुश्रुतं इति सूक्तद्वयं पठित्वा अग्न आयाहि अग्निभिरिति पठेत् ततः अ
ष्टवाध्याये गोर्धया गोर्धपरत्यनुवाकदशसूक्तात्मकोऽशाकलस्य पंचदशसूक्तात्मको बाष्कलस्य तत्रोच्यते गोर्धयतिसूक्तानंतरं यथामनुसंवरणे यथामनुविव
स्वति उप मंत्वामघोनां एतत्त इंद्र भूरिदिंद्र इत्यंतापंचसूक्तानि पठित्वा आत्वागिरो रथीरिवेति पठेयुः अंते संसमित्सूक्तानंतरं पंचदश ऋचात्मकं संज्ञानमुशा
नावदन्त यं योरावृणीमहे इत्येतद्वेदसमाप्तिरिति वा बाष्कलशाखाध्ययनं एवमध्यायानामभावात् शाखाभावइत्यर्थः सूक्तसहस्रसप्तदशाधिकात् अष्टौ सू
क्तानि बाष्कलस्याधिकानीत्यर्थः प्रातिलेख्यवं देवाय ऋत्विजः इमानि वामिति त्रिचत्वारि वालखिल्यस्य सूक्तलोपइत्यर्थः यस्मात् ऋग्वेदं द्वैवाप्यधीते स नाकपृष्ठं भ
जतेइत्याश्वलः अस्यार्थः यः तान् ऋगर्थवित् वेदितः हावनपारायणे च अधीते च सः वेदिताध्येता च नाकपृष्ठं नाश्वलः सदाभजतेहप्रसिद्धः हतोमुं लोकं एकाग
तस्मात्सच्यवतेहीत्यर्थः अथ पारायणफलं तदुक्तमारण्यके यायसंधिं विवर्धयाति तां निर्भुजस्वरूप मयतन्छ्युधे अक्षरे अभिव्याहइतितल्लक्षणसंख्याग उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

११ एषोभयमंतरेणोभयव्याप्तंभवत्यन्नाद्यकामोनिर्भुजंब्रूयात्स्वर्गकामः प्रतृण्णमुभयकामउभयमंतरेणेति अस्यार्थः द्वयोःपदयोर्वापिसंधिरूपस्य अविघेनाध्यय
नंतंनिर्भुजंसंहितापारायणेमुच्यते स्थलेद्वेपदेअक्षरेसंधिमकुर्वतोच्चारणंतत्प्रतृण्णंतत्पदपारायणं संहितापदाभ्यांउभाभ्यांव्याप्तमुभयमंतरेणक्रमपारायण
मित्यर्थः तथाचसतित्रिभिः कृताःस्वरास्वरंविजानाति मात्रामात्रांविभजंति सासंहितेति एवमेताःसंहितायोविजानातिसंधीयतेप्रजयापशुभिर्यशसाब्र
ह्मवर्चसेनस्वर्गेणलोकेनसर्वमायुरिति इति तस्मात्क्रमाद्वतेद्वेपदस्वरश्चनसिध्यति द्वेपदसंधिउत्तरारंभः कार्युनलाक्ष्यते अतश्चपदार्थचक्रकसंस्कृतसिध्यर्थं
भगवतापांचालेनस्थापितानांपारायणकर्मणांक्रमपारायणमुत्तमंभवतीति-चात्रश्लोकः प्रागथोनपुराधानदध्यायज्ञकस्योमहोमुनिः अर्थवंतंक्रमंब्रूयाद्देव
तायाश्चशास्त्रतः अथोक्तर्ग्यजुषांबृंहणंपदैः स्वरैश्चाध्ययनंतथात्रिभिः साधारणंभवति इदमित्थंपाठइति स्वरमात्रादिरूपेणनिश्चयोभवति यथायजुर्वेद
पारायणेयजुषांबृंहणं नामसाधारणंस्वरमात्रादिरूपेणइदमित्थमेवपाठइतिनिश्चयोभवतीत्यतिदिश्यइत्यलंप्रपंचेन अथपारायणविधिः अत्रादौकलशस्था ११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेत्यांतर्विष्यइत्यादि महानाम्नीष्वित्यंतंप्राग्वत् ततोवेदादिमारभ्यसंततमधीयीत नास्यांतरानाध्यायो नास्यांतराजननमरणेशुचिः आशौचंनेहेत्यर्थः नांत
राव्याहारेन्नविरामेद्यावंतमधीयीत यावत्पर्यंतंपठेत्तावन्मध्येनविरामेन्नान्यच्चवदेदित्यर्थः यदंतराविरमेत्रीन्प्राणानायम्यप्रणवंव्याहृतिविधाययावत्कालमधीयी
त ततःसर्वनिशांतरसंग्रामारण्यलिंसेत्वंलोप्यपरिदध्यात् निशांतरंसंध्या निशादिलोप्यवितायसमापयेदित्यर्थः आहावंतेच ब्राह्मणभोजनं दक्षिणांदद्यात् इतिम
हार्णवोक्तं अथकमलाकरः यएवंविधिनावेदमधीयीतसंततःपूतोभवति मंत्रपुक्तिश्चभवति वेदरूपोभवतीत्यर्थः द्वाभ्यांपारायणाभ्यांरुद्रिणश्वासोजनं इहा
धीतेऽन्तेभ्यःप्रमुच्यते त्रिभिःपतनीयेभ्यः शूद्रायारेतःसिक्त्वा गंगाध्रुवंनिमज्जश्चभवति चतुर्भिःशूद्रान्नभोजी स्त्रीसेवनाच्च पंचभिर्यौयाज्यायाजनाद्याद्यग्र
लि- पथि- हणात्षड्भिर्ब्राह्मणस्त्रीहिंसितकरणात्स्त्रुहननात्सुवर्णस्तेयात्पतितसंयोगाच्चसप्तभिः प्राजापत्यस्यहीनवरणाद्यज्ञोपवधनाच्चाष्टभिः चांद्रायणगुरुतल्पगम
नाद्द्विजस्वलागमनाच्चनवभिः सुपागद्दशभिः पुनर्जन्मेहजन्मकृतैःसर्वैःपापैःप्रमुच्यते स्वर्गलोकंगच्छतीति पितॄन्स्वर्गलोकंगमयति अग्निष्टोमादिभिःक्रतुभिरिष्टंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३ वति वेदाध्यायी स वेदस्यादपाप्मा सत्यवाक् शुचिः यं यं कामयते कामं तं तं वेदेन साधयेत् असाध्यं नास्ति यत्किंचिद्ब्रह्मणो हि फलं महत् ऋग्विधाने आद्यैवानुसावित्र्या
कर्म कुर्वीत शांतये पुष्ट्यै परफलाभाय धनलाभाय भूतये एषा हि संहिता दिव्यैः सर्वब्रह्ममयी कृता अग्रेण तपसा दृष्टा विश्वामित्रेण धीमता होमांश्च जपयज्ञांश्च नि
त्यं कुर्वीत वै तया सर्वकामसमृद्ध्यर्थं परं ब्रह्मेदमुच्यते एषा वै प्रतिलोमोक्ता यक्षरात्रुविनाशिनी अक्षरप्रतिलोमार्यै मभिचारेषु शस्यते सर्वसंहितया प्रस्थं वहो
मश्चाज्येन तिलेन वा आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते इति ब्रह्मोक्तेः सर्वपापहरो मंत्रैः सर्वज्ञ स्मृते इति विष्णुधर्मोत्तरात् शातातपः ऋग्वेदं व्याहृतं चै
व वेदपारायणं तथा तिलहोमसहस्रं च सममेतच्चतुष्टयं इदं केवले अंते चांद्रमसं इति कमलाकरभट्टकृतौ वेदपारायणं इति पारायणं इति पारायणविधिः स
माप्तः इति चरणव्यूहे प्रथमकांडव्याख्या संपूर्णा व्याख्या चरणव्यूहस्य आद्यखंडस्य तेन वै यथामति विरचिता द्विजदेव प्रसादतः श्रीकृष्णाय नमः श्रीः
अथ मूलं द्वितीयखंडस्य यजुर्वेदस्य षडशीतिर्भेदा भवंति तत्र चरकाणां मद्वादश भेदा भवंति चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वा १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रायणीया वार्तांतवेयाः श्वेताः श्वेताश्वतराः औपमन्यवः मैत्रायणीयाश्चेति तत्र मैत्रायणीयानाम सप्तभेदा भवंति मानवा दुंदुभाश्चैकेया वाराहा हारिद्रवेयाः श्यामाः
श्यामायनीयाश्चेति तेषामध्ययनमष्टौ शतं यजुः सहस्राण्यधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारो भव
ति षडंगान्यधीत्य षडंगविद्भवति शिक्षाकल्पो व्याकरणं निरुक्तं छंदो ज्योतिषमिति षडंगानि तत्र प्राच्योदीच्यां नैर्ऋत्यां नैर्ऋत्यस्तत्र वाजसनीयानाम सप्तदश भेदा भवं
ति जाबाला बौधेयाः काण्वा माध्यंदिनाः शापीयाः स्थापायनीयाः कापालाः पौंड्रवत्साः आवटिकाः परमावटिकाः पाराशर्या वैधेया वैनेया औधेया गालवा बैज
वापाः कात्यायनीयाश्चेति प्रतिपदमनुपदं छंदोभाषाधर्मो मीमांसा न्यायस्तर्क इत्युपांगानि भवंति उपज्योतिषं सांगलक्षणं प्रतिज्ञानुवाक्याः परिसंख्या चरणव्यूहः
श्राद्धकल्पः प्रवराध्यायश्च शास्त्रं क्रतुसंख्या ऋग्यजुर्गमयज्ञं पार्श्वानि होत्रकं पशवो कथानि कूर्मलक्षणमित्यष्टादश परिशिष्टानि भवंति द्वे सहस्रे शते न्यूने मंत्रे वा
जसनेयके इत्युक्तमेतत्स खिलं सशुक्रियं ग्रंथाश्च परिसंख्यातं ब्राह्मणं च चतुर्गुणं तत्र तैत्तिरीयकानाम द्विभेदा भवंति औखेयाः कांडिकेयाश्चेति कांडिकेयानाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१४ पंचभेदाभवंति आपस्तंबी बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तत्र कठानांतूपगायनतु विशेषः चतुश्चत्वारिंशत्कपग्रंथाः मंत्रब्राह्मणयोर्वेदद्विगु
णं यत्र पठ्यते यजुर्वेदः स विज्ञेयो ह्यन्यच्छाखांतरं स्मृतं एतेषामध्ययनं प्रवचनीयाश्चेति अथषाव्यं यजुर्वेदस्य षडशीतिर्भेदाभवंति अत्रशाखासंख्या
द्यः षडशीतिर्भेदा इत्यर्थः तत्रचरकानामद्वादशभेदाभवंतीतिस्पष्टं ते के चरकाः १ आह्वरकाः २ कठाः ३ प्राच्यकठाः ४ कपिष्ठलकठाः ५ चारायणीयाः ६
वारायणीयाः ७ वार्तांतिरेयाः ८ श्वेताः ९ श्वेततराः १० औपमन्यवः ११ मैत्रायणीयाश्च १२ इति इतिद्वादश मैत्रायणीयशाखागणा इत्यर्थः मैत्रायणीयस्तु
वाजसनेयिसंहिता वेदाध्यायी मानवं कर्मसूत्रं तेषामध्ययनमष्टोत्तरशतं यजुः सहस्राण्यधीत्य शाखापारो भवति तेषामध्ययने द्विचत्वारिंशदध्यायाः ४२
अष्टशताधिकसहस्रमंत्रा इत्यर्थः १८०० तान्येव द्विगुणान्यधीत्य पदपारो भवति द्विवारपठनात् पदपारायणपठनं भवतीत्यर्थः तान्येव त्रिगुणान्यधीत्य क्र
मपारो भवति त्रिवारपठनात् क्रमपारायणं भवतीत्यर्थः पदक्रमाध्ययनं भवतीत्यर्थः तत्र प्राच्या उदीच्या नैर्ऋत्या नैर्ऋत्यस्तत्र वाजसनेयानां सप्तदशभेदा भवं
ति। १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्राच्यामुदीच्यां नैर्ऋत्यां तिसृषु दिक्षु वाजसनेयिवेदोत्पत्तिः अग्नेवस्यामः इतरदेशेषु वेदशाखयो विभाग उच्यते तत्र महार्णवे पृथिव्या मध्यरेखा च नर्मदा
परिकीर्तिता दक्षिणोत्तरयोर्भागे शाखाभेदश्च उच्यते नर्मदादक्षिणेभागे आपस्तंबाश्वलायनी नारायणी पिप्पला च यज्ञकन्याविभागिनः माध्यंदिनी शांखा
यनी कौथुमी शौनकी तथा नर्मदोत्तरभागे च यज्ञकन्याविभागिनः तुंगाकृष्णात या गोदा सह्याद्रिशिखरावधि आंध्रदेशपर्यंतं बह्वृच आश्वलायनी उत्तरेगु
र्जरदेशे वेदो बह्वृच कीर्तितः कौषीतकी ब्राह्मणं च शाखा सांख्यायनी तथा आंध्रादि दक्षिणाग्नेयी गोदासागरकावधि यजुर्वेदस्तु तैत्तिरीयो आपस्तंबी प्रति
ष्ठिता विसोमे आद्यकाले च अग्न्याधाने तथैव च एतैः स्वजातिभिः कुर्याद्यन्यथा पतितो भवेत् अध्वर्युज्ञात होतॄणां संतिसहस्राण्यनेकशः यत्रास्ति योनिसंबं
धः स्वज्ञानकलान्विताः सह्याद्रिपर्वतारंभाद्दिशा नैर्ऋतिसागरात् हिरण्यकेशिशाखा च परशुरामस्य संनिधौ मयूरपर्वतांश्चैव यावद्गुर्जरदेशतः व्याप्ता वा
यव्यदेशे तु मैत्रायणी प्रतिष्ठिता अंगवंगकलिंगाश्च कानीनो गुर्जरस्तथा वाजसनीयशाखा च माध्यंदिनी प्रतिष्ठिता ऋषिणा याज्ञवल्क्येन सर्वदेशेषु विश्रुता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१५ वाजसनीयवेदस्यप्रथमाकण्वसंहिताइति व्यासशिष्योवैशंपायनः निगदाख्यंयजुर्वेदंपठित्वाशिष्यान्चकार तत्रभागवते वैशंपायनशिष्यावैचरकाध्वर्यवो
भवन् यच्चेरुर्ब्रह्महत्यांहः क्षपणंस्वगुरोर्व्रतं याज्ञवल्क्यश्चतच्छिष्यआहाहो भगवन्कियत् चरितेनाल्पसाराणांचरिष्येहंसुदुश्चरं इत्युक्तोगुरुरप्याहकुपि
तोयाह्यलंत्वया विप्रावमंत्राशिष्येणमदधीतंत्यजाश्विति देवरातसुतः सोपिछर्दित्वायजुषांगणं ततोगतोथमुनयोददृशुस्तान्यजुर्गणान् यजूंषितित्तिराभूत्वा
तल्लोलुपतयाददुः तैत्तिरीयाइतियजुःशाखाआसन्सुपेशलाः याज्ञवल्क्यस्ततोब्रह्मंश्छंदांस्यधिगवेषयन् गुरोरविद्यमानानिसूपतस्थेर्कमीश्वरं या
ज्ञवल्क्यउवाच ॐनमोभगवतेइत्यादि जीर्णभुक्तेउच्छिष्टेवांतेयातयामंत्रयद्वइतिनिघंटः एवमेवार्थः यामतयामयजुः काममुपसरामीत्यंतंतुष्टाव ए
वमुक्तःसभगवान्वाजिरूपधरोहरिः यजूंष्ययातयामानिमुनयेदात्प्रसादितः यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः जगृहुर्वाजसन्यस्ताः का
ण्वमाध्यंदिनादयः इत्यादिग्रंथपर्यालोचनयायजुर्वेदस्यागमानंतरंदेवरातसुतः अश्वात्मण्यभियासवित्रास्सूर्येणवाजिरूपेणवाजेभ्यः वाजेनवेगेनवासम्यस्ताः १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यक्ताः शाखाः वाजसनीसंज्ञाः शाखारंडत्वपरिहारार्थं चातुर्वेदित्वसंख्यासंरक्षणार्थं च वाजिरूपेण सूर्येण अयातयामानि यानि यजूंषि मुनये दत्तानि तैर्यजु
र्भिरपरिमितैः स मुनिस्ताः शाखाः पंचदश वाजसनेयीसंज्ञा अकरोत् तस्माच्च मुनेः काण्वमाध्यंदिनादयः अध्ययनं चक्रुः ते पंचदश संभवंति तथा च विष्णुपुरा
णे यजुर्वेदस्य विस्तारं भगवानाह यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने वैशंपायननामा वै व्यासशिष्यश्चकार ह शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्र = नभागिन
मात् याज्ञवल्क्यश्च तस्यासीद्ब्रह्मरातसुतो द्विजः शिष्यः परमधर्मज्ञो गुरुवृत्तिरतः सदा ऋषिर्यश्च महामेरौ समाजे नागमिष्यति तस्य वै सप्तरात्रं तु ब्रह्महत्या
भविष्यति पूर्वमेवं मुनिगणैः समयोऽयं कृतो द्विज वैशंपायन एकोऽवै तं व्यतिक्रांतवांस्तथा स्वस्त्रीयं बालकं सोऽथ पदा स्पृष्टमताडयत् शिष्यानाह च भोः शिष्या
ब्रह्महत्यापहं व्रतं चरध्वं मत्कृते सर्वे न विचार्यमिदं तथा अथाह याज्ञवल्क्यस्तं किमेतैर्बहुभिर्द्विजैः क्लेशितैरल्पतेजोभिश्चरिष्येऽहं सुदुस्तरं ततः क्रुद्धो
गुरुः प्राह याज्ञवल्क्यं महामुनिं मुच्यतां यत्त्वयाधीतं मत्तो विप्रावमानक निस्तेजसो वदस्येतान्यस्त्वं ब्राह्मणपुंगवान् तेन शिष्येण नार्थोऽस्ति ममाज्ञाभंगकारिणा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ याज्ञवल्क्यस्ततः प्राह मयाभक्त्या तथोदितं ममाप्यलं त्वयाधीतं यन्मया तमिदं द्विज श्रीपराशर उवाच इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंष्यथ छर्दयि
त्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज जगृहुस्तित्तिरी भूत्वा तैत्तिरीयास्तु ते ततः ब्रह्महत्याव्रतं चीर्णं गुरुणा नोदितैस्तु
यैः चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम याज्ञवल्क्योऽपि मैत्रेय प्राणायामपरायणः तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषंस्ततः याज्ञवल्क्य उवाच नमः
सवित्रे द्वाराय मुक्तेरमिततेजसे ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः इत्यादि पराशर उवाचेत्यं तं स्तुतिं कृत्वा इत्येवमादिभिस्तेन स्तूयमानः स
वै रविः वाजिरूपधरः प्राह व्रीयतामभिवांछितं याज्ञवल्क्यस्तथा प्राह प्रणिपत्य दिवाकरं यजूंषि तानि मे देहि यानि संति न मे गुरौ पराशर उ॰ एव
मुक्तो ददौ तस्मै यजूंषि भगवान् रविः अयातयामसंज्ञानि यानि वेत्ति न तद्गुरुः यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम वाजिनस्ते समाख्याताः सू
र्य्योऽपि सोऽभवद्यतः शाखाभेदस्तु तेषां वै दश पंच च वाजिनां काण्वाद्यास्तु महाभाग याज्ञवल्क्यप्रकीर्तिताः इति वाजसनेयि वेदोत्पत्तिरित्यर्थः काण्वाः माध्यं १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनाः शापीयाः स्थापायनीयाः कापालाः पौंड्रवत्साः आवटिकाः परमावटिकाः पाराशर्याः वैधेयाः औधेयाः गालवाः वैजवापाः कात्यायनीयाश्चे
ति पंचदशशाखाइत्यर्थः प्रतिपदमनुपदं प्रतिपदेऽनुपदं अल्पपदं कर्तव्यमित्यर्थः छंदः छंदोरत्नाकरादि भाषा भाष्यपरिभाषा धर्मः धर्मशास्त्रं मि
ताक्षरादि मीमांसाप्रसिद्धा न्यायः तर्कः इतिषडंगानि उपज्योतिः ज्योतिःशास्त्रं सांगलक्षणं सामुद्रिकादि प्रतिज्ञानुवाक्याः अनेनवाक्येनअयं सिद्धांतः
परिसंख्यासूत्रगोत्रादि अतश्चरणव्यूहः आश्वकल्पः प्रवराध्यायश्च आश्वक्रतुसंख्याकल्पादिविज्ञातव्या अनुगमयज्ञं यज्ञक्रियापाश्चाग्निहोत्रकं
यज्ञक्रियाहोत्रं पशावोक्थानि पवरूपयज्ञः कर्मलक्षणंयज्ञेप्रसिद्धं इति अष्टादशपरिशिष्टानिभवंति द्वेसहस्रेशते न्यूनेमंत्रेवाजसनेयके इत्युक्तत्वे
तत्सकलंसरूपक्लियं ग्रंथाश्चपरिसंख्यातं वाजसनेयकेवेदे नवशताधिकसहस्रमंत्राइत्यर्थः एतत्सकलंसरूपक्लियंमध्यान्हे शुक्लवर्णेनसूर्येणदत्तः
सरूपक्लयजुः परिसंख्यातमित्यर्थः वेदोपक्रमणेचतुर्दशीयुक्तपौर्णमासीग्रहणात् शुक्लयजुः प्रतिपदायुक्तपौर्णिमाग्रहणात् कृष्णयजुरितिवा आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१७ ह्मणंचचतुर्गुणं वेदश्चतुर्गुणंब्राह्मणमित्यर्थः यजुर्वेदतरोरासन्नशाखा एकोत्तरंशतं तत्रापिचशिखाकाराद्दशपंचाथवाजिनां तत्रापिप्रथमामुख्याशाखेयं
कण्वसंज्ञिकाइतिग्रंथांतरे तैत्तिरीकानांद्विभेदाभवंति औख्याकांडिकियाश्चेति कांडिकेयानांपंचभेदाभवंति आपस्तंबी बौधायनी सत्याषाढी हिरण्यकेशी
आत्रेयीचेति तेषामध्ययनपरिमाणं कांडास्तुसप्तविज्ञेयाः प्रश्नाश्चाधिकवेचतुः चत्वारिंशत्तुविज्ञेया अनुवाकाःशतानिषट् एकपंचाशदधिकंसंख्यायं
चाशदुच्यते द्विसहस्रंचैकशतमष्टानवतिचाधिका लक्षैकंतुद्विनवतिः सहस्राणिप्रकीर्तितं पदानिनवतिश्चैवतथाक्षरंशदुच्यते लक्षद्वयंत्रिपंचा
शत्सहस्राणिशताष्टकं अष्टषष्ट्यधिकंचैवयजुर्वेदप्रमाणकं कांडाः ७ प्रश्नाः ४४ अनुवाकाः ६५१ पंचाशी २१९८ पदानि १९२९० अक्षराणि २५३८६८
शाखावाक्यान्ययुतानिसहस्राणिनवानिच चतुःशतान्यशीतिश्चब्राह्मणवाक्यानिगण्यके इतिब्राह्मणेऽष्टौवाक्यसंख्या १९४८० इतितैत्तिरीयनिगद
वेदस्यसंख्याउक्तेत्यर्थः यत्रकठानांमुख्यशाखायांतु चतुश्चत्वारिंशद्ग्रंथाः अध्यायाः मंत्रब्राह्मणयोर्वेदस्त्रिगुणंयत्रपठ्यते यजुर्वेदः सविज्ञेयो अन्येशाखा १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तरेस्मृताः चतुश्चत्वारिंशदुपग्रंथाः अध्यायाः समीपेषुक्ताश्चतुश्चत्वारिंशत् मंत्रश्च ब्राह्मणंच मंत्रब्राह्मणे तयोः मंत्रब्राह्मणयोः तयोश्च वेद इति संज्ञा
तदुक्तं मंत्रब्राह्मणयोर्वेद इतिनामधेयं इति कृष्णाख्यीयप्रातिशाख्यभाष्यकारेण आपस्तंबसामान्यसूत्रभाष्यकारेण कपर्दिनाधूर्तस्वामिनाच तथाच सतिमं
त्रोनामसंहितामंत्रः तादृङ्मंत्ररूपसंहितायास्तन्मध्ये एव तदग्रे ब्राह्मणत्वेन पठनं इत्यस्य यथापि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणपठनमिति
समंत्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते इत्यर्थः एतादृशं पठनं शाखायां अध्ययनं स यजुर्वेदः स चैतत्तैत्तिरीयशाखायामेवास्ति तथाहि संपश्यामि प्रजा
अहमित्याह प्रजा अहमि प्रजसोमानवीदितिसंहितामंत्रः एतस्यैव ब्राह्मणं संहितायामेव तदग्र एव संपश्यामि प्रजा अहमित्याह यावंत एवैति ब्राह्मणमि[illegible]
[illegible]योरपि संहितात्वेन पदत्वेन क्रमत्वेन पठनं त्रिगुणितं पठनं भवति एतादृशमुदाहरणांतरमाह इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेष्विति
संहितामंत्रः एतस्यैव ब्राह्मणं संहितायामेव तदग्र एव संहितारूपेण वर्तते तत्कथमित्यपेक्षायामाह इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त इति ब्राह्मणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ अनयोरपि त्रिगुणत्वेनपठनं उदात्तश्चानुदात्तश्चस्वरितश्चस्वरास्त्रयः इतित्रिगुणेनपठनंभवति एतेत्रिगुणाः कस्यामपिशाखायांनसंभवंति किंतुगाथाग्रंथत्वा
त् एवमन्यानिबहून्यपिवाक्यानिसंति तानिविस्तरभयान्नोक्तानि अतःकारणात् अन्येशाखांतराः स्मृताः तेषामध्ययनंप्रवचनीयाश्चेति एतेषांशाखानांअ
ध्ययनंप्रवचनीयाः प्रतिवचनीयत्वेनसमाप्तिरित्यर्थः इतिचरणव्यूहेद्वितीयकांडः समाप्तः श्रीगणेशाय० सामवेदः किलसहस्रभेदआसीदनाध्यायेषु
धीयानास्तेशक्रेणाभिहताः प्रनष्टाः शेषान्प्रवक्ष्यामि आसुरायणीया वासुरायणीयावार्तांतरेयाः प्रांजलऋग्वेनविधाः प्राचीनयोग्यानयोग्याराणायनीयाश्चे
ति राणायनीयानवधाभवंति राणायनीयाः शाट्यायनीयाः सत्यमुद्गलाः खल्वामहाखल्वालांगलाः कौथुमागौतमाजैमिनीयाश्चेति तेषामध्ययनंअ
ष्टौसामसहस्राणिसामानिचचतुर्दशान्यष्टौशतानिदशाधिर्दशासप्तसुवालखिल्यः सुपर्णः प्रेक्ष्यमेतत्सामगणंस्मृतं २ अथभाष्यं आसांषोडशशाखानां
तिस्रः शाखाश्चविद्यते ताश्चगुर्जरदेशेकौथुमीप्रसिद्धा कर्णाटकेजैमिनीप्रसिद्धा महाराष्ट्रदेशेराणायनीयाइति तेषांअध्ययनं अष्टौसामसहस्राणिघं १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोगार्चिकसंहिता अंगानितस्यवक्ष्यामिसहस्राणिचतुर्दश अष्टोत्तराणितान्याग्नेयोत्तरस्तथैवच ब्राह्मणंचोपनिषदंसहस्रत्रितयंतथा सामवेदइति कि
लेतिप्रसिद्धो सहस्रभेदआसीत् सहस्रभेदमध्येइंद्रेणवज्रेणाभिहताः प्रनष्टाः अनाध्यायेष्वधीयानाइयंतेविद्युद्दारखलु नोषान् अहतान् शाखापा
ठकान्व्याख्यास्यामः आसुरायणीयावासुरायणीया वार्तांतरेयाः प्रांजलऋग्वैनविधाः प्राचीनयोग्याः नयोग्याः राणायनीयाश्चेति राणायनीयाना
मनवभेदाभवंति राणायनीयाः शाट्यायनीयाः सात्यमुग्राः खल्वलाः महाखल्वलाः लांगलाः कौथुमाः गौतमाः जैमिनीयाश्चेति तेषामध्ययनमष्टौस
मसहस्राणिसामानिचचतुर्दशान्यष्टोत्तराणिदशभिः दशासप्तसुवालखिल्यः सुपर्णप्रेक्ष्यमेतत्सामगणंस्मृतं अथप्रकारांतरेणाह तत्रराणायनीया
नामसप्तभेदाभवंति राणायनीयाः सात्यमुग्राः कालेयाः महाकालेयाः लांगलाः शार्दूलाकौथुमाश्चेति तत्रकौथुमाः षड्भेदाभवंति कौथुमाः आसु
रायणाः वातायनाः प्रांजलिद्वैतंभृतः प्राचीनयोग्याः नैगमेयाइति तेषांकौथुमादीनांअध्ययनं अशीतिशतमाग्नेयंपावमानंचतुःशतं ऐंद्रंतुष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६ डिंशतिः गायंति तानिसूक्तानि अधीत्य वंडाः उक्ताः तेचंडतराः अफलष्टाश्च भवंति अशिष्टानिव्यतिरिक्तानि अधीत्य पठित्वा शिष्टाविंशतिका भवंति शिष्टा
प्रामाणिकान् आविंशति षष्ठेषुनाः शिष्टाभागाः प्रकेशयोग्याः शिष्टा अष्टाविंशतिगणानां पूर्वकः सर्वश्रेष्ठो भवतीत्यर्थः तत्र सूक्तेषु केचिन्मंत्र अंतरा इति मंत्रा
श्चतुर्धा विधीयंते आचार्यस्तदाह ऋक्तंत्रं सामतंत्रं संज्ञानदानं धातुलक्षणमिति इदानीं सामसंख्यामाह अष्टौ साम सहस्राणि सामानि च चतुर्दश अष्टौ शता
निनवति र्विंशति र्वालखिल्यकं सरहस्यं ससुपर्णं प्रैष्यं तत्सामदर्पणं सारण्यकानि सौर्याणि एतत्सामगणं स्मृतं अशीतिशतमाग्नेयं १८० पावमानं १०७
ऐंद्रं तु २६ शिष्टा २८ गणनारकाः अष्टौ साम सहस्राणि सामानि च चतुर्दश अष्टौ शतानि नवति र्विंशति र्वालखिल्यकं अस्यार्थः ८८१४ अंकतो ज्ञातव्यः अ
न्यं शाखासंख्यामाह नवतीति सुपर्णप्रैष्यः कश्चिच्छाखाभेदेन सहवर्तमानः ससुपर्णप्रैष्यः सुपर्णप्रैष्येण सहितो वालखिल्य वालखिल्यशाखाभिदोनव
तिः नवतिसंख्याकाः स्यादशानवो यस्मिन्स नवति दशाद् इति दशातिरिति दशसंख्यासंज्ञा दशगुणा नवतिरित्यर्थः अंकोपि ९० सारण्यकानि आरण्यकेनोपनि १६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्ंगेनसहवर्तमानानिसौर्याणिसूर्यदेवताकानिसूक्तानितत्रवालखिल्यशाखायामेव आरण्यकसूर्यसूक्तसुवर्णश्रेष्यवालखिल्यानिमिलित्वानवशतानी
त्यर्थः निगमयति एतदिति एतत्सर्वोक्तसामसमूहंस्मृतंकथितं गणशब्दस्यबलीयस्त्वंछंदसि राणायनीसात्यमुग्रीदुर्वासाअथवागुणी गौरुडी गौर्जरी भगवा
नौपमन्यवः दाराली गार्ग्यसावर्णिवर्षगण्यश्चेतेदश कुथुमीशालिहोत्रश्चजैमिनिश्चत्रयोदश इत्येतेसामगाचार्याः स्वस्तिकुर्वंतुतर्पिताइति इतिचरणव्यूहेतृ
तीयकांडव्याख्यासंपूर्णा श्रीदेव्यैनमः अथर्ववेदस्यनवभेदाभवंति पैप्पलादाः तौदाः प्रदाता स्तौताः औताः ब्रह्मदाः पलाशौनकीदेवदर्शीचरणविद्याश्चेति तेषा
मध्ययनंपंचकल्पाभवंति कल्पेकल्पेपंचशतेरपिनक्षत्रकल्पोविधानकल्पोविधिविधानकल्पोसंहिताकल्पः शांतिकल्पश्चेति सर्वेषामेववेदानामुपवे
दाभवंति ऋग्वेदस्यायुर्वेदउपवेदः यजुर्वेदस्यधनुर्वेदउपवेदः सामवेदस्यगांधर्ववेदउपवेदः अथर्ववेदस्यशस्त्रशास्त्राणिभवंति ऋग्वेदस्यात्रेयगोत्रं अर्थ=
ब्रह्मदैवत्यंगायत्रंछंदः यजुर्वेदस्यभारद्वाजगोत्रंरुद्रदैवत्यंत्रैष्टुभंछंदः सामवेदस्यकाश्यपगोत्रंविष्णुर्दैवत्यंजागतंछंदः अथर्ववेदस्यबैजायनगोत्रंइंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२० देवत्यं मानुष्टुप्छंदः ऋग्वेदोरुक्मवर्णः पद्मपत्रायताक्षः सुविभक्तग्रीवः कुंचितकेशश्मश्रुः प्रमाणेनद्विरत्निमात्रः यजुर्वेदः कृशोदीर्घः कपालीताम्रवर्णः कां
चननयनआदित्यवर्णोवर्णेनपंचारत्निमात्रः सामवेदोनित्यस्रग्वीशुचिः शुचिवासाः सोमीदांतीचर्मीदंडीकांचननयनः श्वेतवर्णोवर्णेनषडरत्निमात्रः अ
थर्ववेदस्तीक्ष्णश्चंडः कृष्णः कामः कामरूपीक्षुद्रकर्मस्वविसाध्यः सविश्वसृजगलं स्पर्धिगालवः स्वदारतुष्टः परस्त्रियान्ययश्चेतिनवारत्निमात्रः यइदं
देवतंरूपंगोत्रंप्रमाणंछंदोवर्णंवर्णयतिसोविद्यांलभते जन्मजन्मनिवेदपारोभवति जन्मजन्मनिवेदधारोभवति अप्रहितःप्रहितोपवर्त्याश्चैव्रतोव्रतीस
वर्त्यब्रह्मचारीब्रह्मचारीभवतिजातिस्मरोजायते नमःशौनकायनमःशौनकायनमःपरमऋषिभ्योनमःपरमऋषिभ्यः यइदंचरणव्यूहंपर्वसुश्रावयेद्वि
जः धौतपाप्माशुचिर्विप्रोब्रह्मसायुज्यकल्पते यइदंचरणव्यूहंश्राद्धकालेसदापठेत् अक्षय्यंतद्भवेच्छ्राद्धंपितृंश्चैवोपतिष्ठति यइदं०गुर्विण्याःश्रावये
त्स्त्रियाः पुमांसंजनयेत्पुत्रंसर्वज्ञंवेदपारगं योधीतेचरणव्यूहंसविप्रःपंक्तिपावनः तारयत्यखिलान्पूर्वान्पुरुषान्सप्तसप्तच योनामानिपुरादेवाअमृतत्वंच

२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गच्छति लोकातीतं महाशांतममृतत्वं च गच्छतीत्याह भगवान्व्यासः पाराशर्यो व्यासः पाराशर्यः नमः परमऋषिभ्यो नमः परमऋषिभ्यः तं वेदशास्त्रपरिनिष्ठितशुद्ध
बुद्धिं चर्मांबरं सुरमुनींद्रनुतं कवींद्रं कृष्णत्विषं कनकपिंगजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनां व्यासं वशिष्ठनप्तारं शक्तेः पौत्रमकल्मषं पराशरात्म
जं वंदे शुकतातं तपोनिधिं अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः अभाललोचनः शंभुर्भगवान्बादरायणः इति चरणव्यूहे चतुर्थकांडमूलं अथ भाष्यं अ
थर्ववेदस्य नव भेदा भवंति नव शाखा भवंतीत्यर्थः तानाह पैप्पलादा दांताः प्रदांताः स्तौताः औताः ब्रह्मसद्यापत्रौलौशौनकी वेददर्शी चरणविद्याश्चेति तेषामध्ययनं द्वादशस
हस्राणि यत्र बहुवचनं ते बहवः यत्र एकवचनं स एक एव तेषामध्ययनं संख्या बोध्यते द्वादशसहस्राणि मंत्राणां कीदृशानि पंचकल्पानि कल्पे कल्पे एकस्मिन्क
ल्पे पंचशतानि मंत्राणां कल्पानाह नक्षत्रकल्पः विधानकल्पः संहिताविधिकल्पः अभिचारकल्पः शांतिकल्पः इति पंचकल्पाः वेदानां चत्वार उपवेदा भवंति
आयुर्वेदश्चिकित्साशास्त्रं ऋग्वेदस्योपवेदः धनुर्वेदो युद्धशास्त्रं यजुर्वेदस्योपवेदः गांधर्ववेदः संगीतशास्त्रं सामवेदस्योपवेदः अर्थशास्त्रं नीतिशास्त्रं विश्वकर्मादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९ शिल्पशास्त्रं अथर्ववेदस्योपवेदः भगवान्व्यासः स्कंदकुमारोवाइति यइमेचत्वारोवेदाउक्तास्तेषांमध्ये एकैकस्यकीदृशंरूपं कआकारः तत्तद्वर्णसितासितादि
वर्णश्चाकारश्चोच्यते ऋग्वेदस्वरूपमाह ऋग्वेदः पद्मपत्रायताक्षः पद्मपत्रंकमलदलंतद्वदक्षिणीनेत्रेयस्यसः सुविभक्तग्रीवः सुविभक्तारेखयांकिताग्रीवायस्य
स्यसः कुंचितकेशश्मश्रुः कुंचितः वलीमंतः केशाः शिरसिजाः श्मश्रूणिमुखरोमाणियस्यसः वर्णेनश्वेतवर्णः श्वेतोवर्णोयस्यसः तावत्साकल्येनपंचवितस्तिःस्याद
रत्निः एतत्प्रमाणंऋग्वेदस्यकीर्तितं उक्तं वितस्तिशब्देद्वादशांगुलः सार्धहस्तद्वयप्रमाणमित्यर्थः यजुर्वेदस्वरूपमाह यजुर्वेदः पिंगेपीतेअक्षिणीयस्यसः कृश
मध्यः कृशः मध्यः कटिप्रदेशोयस्यसः स्थूलागलकपोलकः स्थूलौगलकपोलौयस्यसः ताम्रपीतवर्णः ताम्रपीतस्ताम्रवदाचरितोरक्तोवर्णोयस्यसः यद्वा
कृष्णवर्णः कृष्णोवर्णोयस्यसः दीर्घत्वेनोच्चत्वेनषट्प्रादेशमात्रः षट्प्रादेशाः प्रमाणंयस्यसः प्रमाणोमात्रच्प्रत्ययार्थः प्रादेशस्तुप्रदेशिनीत्यभिधानोक्तेः अंगुष्ठ
प्रदेशिन्योर्विहितत्वात् प्रमाणंप्रादेशिन्योर्दशांगुल्यः ताः दशाषट्प्रादेशाः प्रमाणं षष्ठ्यांगुलसार्धद्वयहस्तमित्यर्थः सामवेदस्वरूपमाह सामवेदोनित्यस्रग्वी २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेजोस्यास्तीति स्त्रग्वी अस्यामायामेधास्त्रजाविति नित्यपुष्पमालाधारी सप्रयतनियमवान् शुचिः पवित्रः शुचिवासाः रुचिरूरूपंवासोवस्त्रंयस्य शुक्लवस्त्रधारी शमी
शमः शांतिरस्यास्तीति शमी शांतमनाः दांतः नियतेंद्रियवान् बृहच्छरीरः बृहन्मोच्छरीरंयस्यसः शमी दंडी शमीतरोर्दंडोयस्यसः कातरद्वक्षान् द्विनयननेत्रैर्नैय
स्यसः वर्णेन आदित्यवर्णः आदित्यस्यभानोर्वर्ण इव वर्णोयस्यसः नवारत्निमात्रः नवअरत्नयः प्रमाणंयस्यसः सार्धचतुष्टयहस्तदीर्घ इत्यर्थः अथर्ववेद
स्वरूपमाह अथर्ववेदश्च पुनस्तीक्ष्णः उग्रः प्रचंडः क्रोधी कामरूपी कामिनरूपाणियस्यसः स्वेच्छारूपधारी विश्वात्मा विश्वंस्यात्मा विश्वस्यकर्ता स्त्रष्टा च
पनिषद्बाहुल्यात् क्षुद्रकर्मा क्षुद्राणिकर्माणियस्यसः अभिचारकृत्याप्रयोजककर्ममंत्रबाहुल्यात् स्वशाखाध्यायी अथर्वणि विशेषः उत्पलं श्यामकमलं तथावर्णो
यस्यसः श्यामसुंदर इत्यर्थः दशारत्निमात्रः पंचहस्तप्रमाण इत्यर्थः अथ चतुर्वेदानां गोत्रदेवताछंदांस्याह ऋग्वेदस्यात्रियगोत्रं आत्रेयाः सगोत्राः समानंगो
त्रायस्यतत् अत्रिगोत्र ऋग्वेद इत्यर्थः सोमदेवतं यस्यतत् गायत्रीछंदः गायत्रीछंदोयस्यतत् एवमग्रेव्याख्यातव्यं यजुर्वेदस्वरूपमाह काश्यपगोत्रं रुद्रदैवतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ त्रिष्टुप्छंदः काश्यपगोत्रेंद्रदैवत्यत्रिष्टुप्छंदस्कोयजुर्वेद इत्यर्थः अथसामवेदस्वरूपमाह भारद्वाजगोत्रंविष्णुदैवत्यंजगतीछंदः अथर्ववेदस्यवैजायनगोत्रं
ब्रह्मदैवत्यंअनुष्टुप्छंदः अथफलश्रुतिमाह यइदमिति यःपुमान्इदंवेदानांनामरूपगोत्रप्रमाणछंदोदैवतवर्णं वर्णयति नामादीनांद्वंद्वेकवद्भावः नामऋ
ग्वेदादि रूपंपद्मपत्रादि गोत्रंआत्रेयादि प्रमाणंलंबवितस्त्यादि छंदोगायत्र्यादि दैवतंसोमादि वर्णंश्वेतादिच योजानाति सश्रविद्योविद्याहीनः सन्विद्यांल
भतेप्राप्नोति अथजन्मांतरेजातिस्मरोजायते पूर्वंजातिंस्मरति जन्मनिजन्मनिजन्मप्रभृति वेदपारो वेदपाठीभवति अव्रती व्रतहीनोव्रतवान्भवति व्रतफल
माप्नोति अब्रह्मचारीब्रह्मचारीभवति ब्रह्मचर्यहीनोपिब्रह्मचर्यफलमाप्नोतीत्यर्थः शौनकाचार्यायनमः पदादन्तिर्ग्रंथसमाप्त्यर्थो श्रवणपठनफलमाह
यइदमिति यःपुमान्इदंचरणव्यूहंभगिनीःस्त्रियंश्रावयेत् सास्त्रीपुमांसंपुरुषलक्षणोपेतंपुत्रंजनयेत् इदंश्राद्धकालेपठेत् अत्याल्पितॄन्प्राप्नोतित
र्पयतीत्यर्थः यइदंचरणव्यूहंप्रत्यहंपठेत् सपंक्तिपावनोभवति यस्यांद्विजःपंक्तावास्तेतांसर्वांपुनातीत्यर्थः सचपुत्रान्प्रभृतीन्पुत्रादिकान्सप्तचपुनःसप्ततान्
२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२३ आद्यादीन् पित्रादींश्च आत्मादींश्च पंचदश पुरुषान् तारयति यद्दं० निस्वराः पर्वसु अष्टमीष्वतदर्शपौर्णमासीसंक्रांतिषु वा पठति स धूलयाश्चाघलोदरीकृतो
या पापापायं येनात एव शुचिः पवित्रः सन् ब्रह्मसायुज्याय ब्रह्मभावाय गच्छति। कर्मणि च इति चतुर्थी भावं प्राप्नोतीत्यर्थः इति श्री चरणव्यूहे चतुर्थः कांडः संपूर्णः
समाप्तमिदं भाष्यं च त्रिरसांगधरामिते १६६३ गतेब्दे मधुमासे दशमीतिथौ सुधांशौ महिदासविदा परोपकृत्यै चरणव्यूहमिदं व्यकारि कान्तया १ विद्वद्भिः
प्रार्थितेनेदं महीदासद्विजन्मना चरणव्यूहविवृतिर्विहिता च मयाकृता २ इति श्री महीदासपंडितविरचितं चरणव्यूहभाष्यं संपूर्णं श्रीकृष्णार्पणमस्तु
शके १७०२ साधारणनामसंवत्सरे आषाढमासे शुक्लपक्षे नवम्यां सौम्ये दिवा सार्धप्रहरयामे विठ्ठलात्मजगंगाधरेणेदं पुस्तकं समलेखि स समर्पितं चांबाप्रदे श्रीः २३

KKSU LIBRARY RAMTEK 441 106 M-1487 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=15.10.20 17:24
,TRANSFERRED=2020/10/15 at 17:31:18
,PAGES=44
,TYPE=STD
,NAME=S0004027
,Book Name=M-1487-CHARANVYUBHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection